अदैविकं प्रत्याब्दिकैकोद्दिष्टम् । अन्यत्र छाया-मघादौ नाधिकारः न नित्याधिकारः सपिण्डी-करणान्तानि यानि श्राद्धानि षोड़श । पृथङ्-नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचिदित्य-श्चापिना समुच्चितस्यापृथग्द्रव्यस्य पुंसः सपिण्डी-करणान्तानीति विशेषणात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते ॥ * ॥ मघात्रयोदशी-निमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः ।
"भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम् ।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते ।
ऋक्षे पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत् ॥"
इति देवीपुराणात् । भौजङ्गी पञ्चमी । चन्द्रार्क-सङ्गमोऽमावास्या । पितृदैवते ऋक्षे मघायाम् ।
शातातपः ।
"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते ॥
अक्षय्यं दक्षिणा स्वस्ति सौमनस्यं यथास्थिति ।"
इति तिथ्यादितत्त्वम् ॥

मघाभवः, पुं, (मघायां भवः ।) शुक्रग्रहः । इति हेमचन्द्रः ॥ मघानक्षत्रजाते त्रि ॥

मघाभूः, पुं, (मघायां मघासमीपस्थपूर्व्वफल्-गुन्यां भवतीति भू+क्विप् ।) शुक्राचार्य्यः । इति त्रिकाण्डशेषः ॥

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारण-तयास्त्यस्या इति । मघा+अर्शआद्यच् । गौरा-दित्वात् ङीष् ।) धान्यभेदः । इति मेदिनी । घे,३॥

मघोनी, स्त्री, (मघोनः पत्नीति । मघवन्+स्त्रियां ङीष् । वकारस्य च सम्प्रसारणम् ।) इन्द्राणी । इति मुग्धबोधव्याकरणम् ॥

मङ्कुरः, पुं, (मङ्कयति भूषयतीति । मकि+बाहु-लकादुरच् ।) मुकुरः । इत्यमरटीकायां भरतः ॥

मङ्क्ता, [ऋ] त्रि, (मज्जति स्नाति इति । मस्ज्+तृच् । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् ।) स्नानकर्त्ता । इति मस्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम् ॥

मङ्गः, पुं, (मङ्गति सर्पतीति मगि+अच् ।) नौकाशिरः । इति हेमचन्द्रः ॥

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनास्मादिति । मगि+"मङ्गेरलच् ।" उणा० ५ । ७० । इत्यलच् ।) अभिप्रेतार्थ-सिद्धिः । इति तिथ्यादितत्त्वम् ॥ तद्वति, त्रि । इत्यमरः ॥ यथा, रामायणे । २ । २३ । ३० ।
"मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव ॥"
तत्पर्य्यायः । भावुकम् २ भव्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६ । क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ श्रेयसम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ रिष्टम् १४ मद्रम् १५ शस्तम् १६ । इति शब्दरत्नावली ॥ (यथा, भागवते । ५ । १४ । ३४ ।
"मङ्गलाय च लोकानां क्षेमाय च भवाय च ।"
"कल्याणं मङ्गलं क्षेमं शातं शर्म्म शिवं शुभम् ।
इति वैद्यकरत्नमालायाम् ॥

शिखिदृषगजगोधा रासभो भृङ्गराजो
मुखरपिककपोतो पोतकी सूकरी वा ।
सदसु विहगराजो मङ्गलाशंसिनः स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः ॥"
इति हारीते द्वितीयस्थाने सप्तमेऽध्याये ।)
सर्व्वार्थरक्षणम् । इति मेदिनी । ले, १२० ॥*॥
मङ्गललक्षणं यथा,—
"प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम् ।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥"
इत्येकादशीतत्त्वम् ॥ * ॥
मङ्गलजनकद्रव्याणि । यथा,—
"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम् ।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम् ॥
वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम् ।
पर्णञ्च परिपक्वानि फलानि विविधानि च ॥
पतिपुत्त्रवतीं नारीं प्रदीपं मणिमुत्तमम् ।
मुक्तां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम् ॥
ददर्शैतानि वस्तूनि मङ्गलानि पुरो मुने ! ।
शृगालं नकुलं चाषं शवं वामे शुभावहम् ॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम् ।
पारावतं शङ्खचिल्लं चक्रवाकञ्च मङ्गलम् ॥
कृष्णसारञ्च सुरभीं चमरीं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च पताकां दक्षिणे शुभाम् ॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम् ।
हरिशब्दस्य सङ्गीतं घण्टाशङ्खध्वनिन्तथा ।
दृष्ट्वा श्रुत्वा स जगाम हर्षेण तात ! मन्दिरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः ॥ * ॥ अपि च ।
"ददर्श वर्त्मन्येवञ्च मङ्गलार्हं शुभप्रदम् ।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम् ॥
वामे शवं शिवां पूर्णकुम्भं नकुलमेव च ।
पतिपुत्त्रवतीं साध्वीं दिव्याभरणभूषिताम् ॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम् ।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम् ॥
वत्सप्रयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम् ।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि पायसम् ॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम् ।
सद्योमांसं चन्दनञ्च माध्वीकं घृतमुत्तमम् ॥
कृष्णसारं फलं लाजान् स्निग्धान्नं दर्पणन्तथा ।
विचित्रितं विमानञ्च सुदीप्तां प्रतिमान्तथा ॥
चक्रं ददर्श देवं तं पञ्चवक्त्रं त्रिलोचनम् ।
शुद्धस्फटिकसङ्काशं नागराजैर्विराजितम् ॥
शुक्लोत्पलं पद्मवनं शङ्खचिल्लञ्च कोरकम् ।
मार्जारं पर्व्वतं मेघं मयूरशुकसारसम् ॥
शङ्खकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम् ।
विचित्रं कृष्णसङ्गीतं हरिशब्दं जयध्वनिम् ॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः ।
प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः ॥
अन्यच्च ।
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुता-शनः ।

हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि शततं पश्येन्नमस्येदर्चयेत्ततः ।
प्रदक्षिणन्तु कुर्व्वीत तथा चायुर्न हीयते ॥
दूर्व्वां दधि सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम् ।
मृद्गोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च ॥
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम् ।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्याद्द्विजजातिधर्म्मम् ॥"
इति मत्स्यसूक्तमहातन्त्रे ४३ पटलः ॥
वर्णभेदे मङ्गलप्रश्नभेदो यथा,—
"ब्राह्मणान् कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥

मङ्गलः, पुं, (मगि+"मङ्गेरलच् ।" उणा० ५ । ७० । इति अलच् ।) ग्रहविशेषः । तत्प-र्य्यायः । अङ्गारकः २ भौमः ३ कुजः ४ वक्रः ५ महीसुतः ६ वर्णार्चिः ७ लोहिताङ्गः ८ खोल्मुकः ९ ऋणान्तकः १० । इति शब्दरत्नावली ॥ आर ११ क्रूरदृक् १२ आवनेयः १३ । इति ज्योतिष-तत्त्वम् ॥ स च रक्तगौरमिश्रितवर्णः । दक्षिण-दिक्पुरुषक्षत्त्रियजातिसामवेदतमोगुणतिक्त-रसमेषराशिप्रवालावन्तिदेशानामधिपतिः । मेषवाहनः । चतुरङ्गुलप्रमाणः । आरक्तमाल्य-वसनः । भरद्वाजमुनिसन्तानः । चतुर्भुजः शक्तिवराभयगदाधारी । सूर्य्याभिमुखः । अस्याधिदेवता कार्त्तिकेयः । प्रत्यधिदेवता पृथिवी । स तु पित्तप्रकृतिः । युवा । क्रूरः । वनचारी । मध्याह्नकाले प्रबलः । गैरिकादि-धातुस्वामी । चतुष्पदानां प्रभुः । चतुष्कोणा-कृतिः । सुवर्णकारादीनां स्वामी । ज्वलित-भूमिचारी । किञ्चिदङ्गहीनः । कटुरसप्रियः । ताम्रवर्णरक्तद्रव्यस्वामी च । इति ग्रहयागतत्त्व-लघुजातकादयः ॥ * ॥ अस्योत्पत्तिर्यथा,—
"उपेन्द्रवीर्यात् पृथ्व्यान्तु मङ्गलः समजायत ।
वसुन्धरायां बलवान् तन्मे व्याख्यातुमर्हसि ॥
सौतिरुवाच ।
उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा ।
विधाय सुन्दरी वेशमचला प्रौढ़यौवना ॥
मलिता तस्य तल्पे च सहसा समुपस्थिता ।
सुरम्यां मालतीमालां ददौ तस्मै वराङ्गना ॥
उपेन्द्रस्तन्मनो ज्ञात्वा कामी मन्मथपीड़ितः ।
नानाप्रकारशृङ्गारं चकार च तया सह ॥
तदङ्गसङ्गमासक्ता मूर्च्छां प्राप सती तदा ।
मृतेव निद्रिता वासौ वीर्य्याधानकृते हरौ ॥
विहाय तत्र रहसि जगाम पुरुषोत्तमः ।
उर्व्वशी पथि गच्छन्ती बोधयामास तां मुने ! ।
सा च पप्रच्छ वृत्तान्तं कथयामास भूश्च ताम्
वीर्य्यं सम्भरणं कर्त्तुं सा चाशक्ता च दुर्ब्बला ।
प्रवालस्याकरे न्यस्ता वीर्य्यन्यासं चकार सा ।